**COHERENCE** – The Multidisciplinary Research Journal
VolumeNo: 16, Issue No: 2, Year: 2025 (July-December)
PP: 151-154
ISSN:0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

# वैयाकरणसिद्धान्तकौमुद्याः व्याख्या-सम्पत्तय

डॉ. बद्री नारायण चौधरी
ग्राम+पो.- सहसराम, थाना बिरौल, जिला- दरभंगा

## सारांश

संस्कृतव्याकरणपरम्परायां भट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी अत्यन्तं महत्त्वपूर्णः ग्रन्थः अस्ति। अयं ग्रन्थः पाणिनीयव्याकरणस्य अध्ययन-अध्यापनयोः सुगमतां सम्पादयितुं रचितः अष्टाध्याय्याः सूत्राणि विषयानुसारं पुनर्विन्यस्य भट्टोजिदीक्षितेन व्याकरणाध्ययनं सरलतरं कृतम् ।

सिद्धान्तकौमुद्याः लोकप्रियतया तस्याः अनेकेषां व्याख्यानग्रन्थानां रचनायाः प्रेरणा जाता। एताः व्याख्याः सिद्धान्तकौमुद्याः गूढार्थप्रकाशनं, सूत्रार्थस्पष्टीकरणं तथा विद्यार्थिनां बोधसौकर्यं च साधयन्ति। सिद्धान्तकौमुद्याः व्याख्यासम्पत्तिषु प्रमुखतया प्रौढमनोरमा, तत्त्वबोधिनी, बालमनोरमा, लघुशब्देन्दुशेखरसम्बद्धव्याख्यानि, सुबोधिनी, रत्नाकरः, भावप्रकाशिका इत्यादयः ग्रन्थाः उल्लेखनीयाः सन्ति । एतेषु विशेषतया प्रौढमनोरमा नाम व्याख्या भट्टोजिदीक्षितेनैव विरचिता, या सिद्धान्तकौमुद्याः गूढतत्त्वानां प्रकाशनं करोति । अस्याः उपरि वासुदेवदीक्षितेन विरचिता तत्त्वबोधिनी व्याख्या अपि विद्वत्समाजे बहुप्रशस्ता वर्तते ।

बालमनोरमा, या वासुदेवदीक्षितपुत्रेण हरिदीक्षितेन विरचिता, विद्यार्थिनां कृते विशेषोपयोगिनी मन्यते। अस्यां कठिनविषयाः सरलभाषया विवेचिताः सन्ति। एतादृशैः व्याख्यानग्रन्थैः सिद्धान्तकौमुदी केवलं व्याकरणग्रन्थः न भवति, अपितु व्याकरणविद्यायाः समृद्धपरम्परायाः केन्द्रबिन्दुरूपेण प्रतिष्ठिता दृश्यते। व्याख्यासम्पत्तीनां माध्यमेन सिद्धान्तकौमुद्याः अध्ययनं अधिकं सुलभं, स्पष्टं तथा ग्राह्यं जातम्। तासु व्याख्यासु व्याकरणीयन्यायाः, परिभाषाः, उदाहरणानि, भाष्यकारमतानि तथा परवर्तीवैयाकरणानां दृष्टिकोणाश्च सम्यगुपस्थापिताः सन्ति । अतः सिद्धान्तकौमुद्याः व्याख्यासम्पत्तयः संस्कृतव्याकरणसाहित्यस्य अमूल्यनिधिरूपेण परिगण्यन्ते ।

**भूमिकाः** श्री भट्टोजिदीक्षित महोदयेन स्वयं सिद्धान्तकौमुद्याः व्याख्या प्रणीता, या "प्रौढमनोरमा" इति नाम्ना प्रसिद्धाऽस्ति । अत्र तेन प्रक्रियाकौमुद्यास्तट्टीकानाञ्च स्थाने स्थाने खण्डनं विहितम् । श्रीभट्टोजिदीक्षितेन "यथोत्तरं मुनीनां प्रामाण्यम्" इत्यत्र महद्बलं प्रदत्तमस्ति।

श्रीभट्टोजिदीक्षितेन प्रणीतायाः 'प्रौढमनोरमा'याः संवत् १७०८ वैक्रमाब्दस्यैको हस्तलेखः पूनास्थ-भण्डारकर-प्राच्यविद्यासंस्थाने वर्तते।

प्रौढमनोरमायां श्रीभट्टोजिदीक्षित-पौत्रेण श्रीहरिदीक्षितेन "बृहच्छब्दरत्न"नाम्नी "लघुशब्दरत्न"नाम्नी च व्याख्या प्रणीता। तत्र लघुशब्दरत्नं मुद्रितं सर्वत्र प्राप्यते, परं बृहच्छब्दरत्नमिदानीं यावदमुद्रितमेवास्ति। केचन विद्वांसो मन्यन्ते यन्नागेशभट्ट एव लघुशब्दरत्नं स्वयं विलेख्य स्वगुरोर्नाम्ना प्रकाशितवान्। लघुशब्दरत्नेऽप्यनेकैर्विद्वद्भिः टीका विलिखिताः।


© Copyright @ Authors

सं० १५५०-१६०० वैक्रमाब्दमध्यकाल-समुत्पन्नेन श्रीवामनेन्द्रसरस्वतीशिष्येण श्रीज्ञानेन्द्रसरस्वतीमहोदयेन सिद्धान्तकौमुद्यां 'तत्त्वबोधिनी' नाम्नी व्याख्या प्रणीता।

सं० १६००-१६७५ वैक्रमाब्दमध्यकालिकेन श्रीज्ञानेन्द्रसरस्वतीशिष्येण श्रीनीलकण्ठवाजपेयीमहोदयेन तत्त्वबोधिन्याः "गूढार्थदीपिका" नाम्नी टीका, सिद्धान्तकौमुद्याश्च "सुबोधिनी" नाम्नी व्याख्या प्रणीता।

सं० १६८८-१७२० वैक्रमाब्दमध्यकालिकेन तात्कालिकोत्कृष्ट-शैव-विदुषा श्रीमधुकरत्रिपाठितनूजेन श्रीरामानन्दनामाभिधेयेन विदुषा सिद्धान्तकौमुद्याः "तत्त्वदीपिका" नाम्नी टीका प्रणीता। सा सम्प्रति हलन्त-स्त्रीलिङ्गं यावदुपलभ्यते। प्रायेण सं० १७१५ वैक्रमाब्देन श्रीवेङ्कटाद्रिभट्टात्मज-श्रीमत्तिरुमलभट्टतनूजेन श्रीरामकृष्णभट्टनामाभिधेयेन विदुषा सिद्धान्तकौमुद्याः 'रत्नाकर'नाम्नी टीका प्रणीता। अस्याः हस्तलेखाः तञ्जौर राजकीयपुस्तकालये, जम्मूस्थरघुनाथमन्दिरपुस्तकालये च वर्तन्ते। जम्मूस्थहस्तलेखेष्वेकस्य लेखनकालः सं० १७४४ वर्तते।[1] भण्डारकरप्राच्यविद्यासंस्थानपूना-संग्रहटीकाग्रन्थे अस्याः चत्वारो हस्तलेखाः प्राप्यन्ते।[2]

सं० १७३०-१८२० वैक्रमाब्दमध्यकालिकेन श्रीनागेशभट्टाचार्येन विदुषा सिद्धान्तकौमुद्याः 'बृहच्छब्देन्दुशेखरः' 'लघुशब्देन्दुशेखरः' इत्याख्ये द्वे टीके विरचिते। लघुशब्देन्दुशेखरेऽनेकाष्टीकाः सुविरचिताः।

सं० १७४५ वैक्रमाब्दीयेन चोलदेशान्तर्गतकरणिडमाणिक्यग्रामनिवासिना श्रीरङ्गनाथयज्व विदुषा सिद्धान्तकौमुद्याः 'पूर्णिमा' नाम्नी टीका विरचिता।[3] सं० १७४०-१८०० वैक्रमाब्दमध्यकालिकेन चोल-तञ्जोरदेशस्य भोसलेवंशीयशाहजी-शरभजी-तुक्कोजीत्याख्य-त्रयाणां राज्ञां मन्त्रिणः विदुषः सार्वभौमआनन्दरायस्याऽध्वर्युणा श्रीमहादेववाजपेयिसूनुना श्रीविश्वेश्वरवाजपेयिशिष्येण श्रीवासुदेववाजपेयि महाभागेन विदुषा सिद्धान्तकौमुद्याः "बालमनोरमा" नाम्नी टीका विरचिता। टीकेयमतीवसरलेति कृत्वा छात्राणां कृतेऽतीवोपयोगिनी भवति।

श्रीदेवीदत्तात्मजश्रीरामसेवकपुत्रेण श्रीकृष्णमित्र विदुषा सिद्धान्तकौमुद्याः 'रत्नार्णव' नाम्नी टीका प्रणीता, यस्याः उल्लेखः श्रीऔफ्रेख्तमहोदयेन स्वकीये बृहत्सूचीपत्रे विहितः। सं० १८१७ वैक्रमाब्दीयेन शेषकुलोत्पन्नेन श्रीनागोराजपण्डितानां पुत्रेण श्रीरामचन्द्रपण्डितेन सिद्धान्तकौमुद्याः स्वरप्रक्रियांशस्य व्याख्या विलिखिता। जम्मूस्थरघुनाथमन्दिरपुस्तकालये समुपलब्धे हस्तलेखेऽन्तिमे भागेऽधोलिखितः पाठ सम्प्राप्यते- 'इति शेषकुलोद्भूतेन नागोजिपण्डितानां पुत्रेण रामचन्द्रपण्डितेन विरचिता स्वरप्रक्रियाव्याख्या समाप्ता। सं० १८४७ वैशाखमासे शुक्लपक्षे वार शनैश्चरः।'

प्रायेण सं० १७०० वैक्रमाब्दीयेन श्रीवेङ्कटाद्रिपुत्रेण श्रीमत्तिरुमल्लद्वादशाहयाजिमहोदयेन सिद्धान्तकौमुद्याः 'सुमनोरमा' नाम्नी टीका समुद्घाटिता। सुमनोरमाया एको हस्तलेखस्तञ्जौरपुस्तकालये समुपलभ्यते।[4]

एतदतिरिक्तं सिद्धान्तकौमुद्याः अधोलिखितानां टीकानां हस्तलेखाः तञ्जौरपुस्तकालये[5] उपलभ्यन्ते-
१. तोप्पलदीक्षितकृता – प्रकाशटीका


© Copyright @ Authors

२. अज्ञातकर्तृका – लघुमनोरमा

३. अज्ञातकर्तृका – शब्दसागरटीका

४. अज्ञातकर्तृका – शब्दरसार्णवटीका

५. अज्ञातकर्तृका – सुधाञ्जनटीका

एतदतिरिक्ता, श्रीलक्ष्मीनृसिंहनामाभिधेयेन विदुषा प्रणीतायाः 'विलास' नाम्न्याष्टीकाया हस्तलेखो मद्रासराजकीयपुस्तकालये समुपलभ्यते।[6] औफ्रेख्तमहोदयेन स्वकीये बृहत्सूचीपत्रे सिद्धान्तकौमुद्याः अधोलिखितानां टीकानामुल्लेखो विहितः-

१. शिवरामचन्द्रसरस्वती - रत्नाकर टीका

२. इन्द्रदत्तोपाध्यायः - फक्किकाप्रकाशिका टीका

३. सारस्वतव्यूढमिश्रः - बालबोध टीका

४. वल्लभः - मनोरञ्जनी

**प्रौढमनोरमा-खण्डनकर्तार**

अनेकैर्वैयाकरणैर्भट्टोजिदीक्षित-प्रणीतायाः प्रौढमनोरमायाः खण्डने ग्रन्थाः प्रणीताः-

1. शेषवीरेश्वरपुत्रः (सं० १५७५ वि०)- श्रीशेषवीरेश्वरपुत्रस्य तद्ग्रन्थस्य नाम न ज्ञायते, तेन प्रौढमनोरमाखण्डने यो ग्रन्थः प्रणीतः स सम्प्रति न प्राप्यते।
2. चक्रपाणिदत्तः (सं० १५००-१५५० वै०)- चक्रपाणिदत्तेन भट्टोजिदीक्षितप्रणीतायाः प्रौढमनोरमायाः खण्डने "परमत-खण्डनम्" इत्यभिधेय एको ग्रन्थः प्रणीतः। चक्रपाणिदत्त-प्रणीतं प्रौढमनोरमा-खण्डनम् सम्पूर्णरूपेण सम्प्रति नोपलभ्यते।
3. पण्डितराजो जगन्नाथः (सं० १६१७-१७३३ वै०)- पण्डितराजेन जगन्नाथेन भट्टोजिदीक्षितप्रणीतायाः प्रौढमनोरमायाः खण्डने "कुचमर्दनम्" नामा ग्रन्थः प्रणीतः। ग्रन्थोऽयं सम्प्रति सम्पूर्णरूपेण नोपलभ्यते, अस्य केचनांशाः सं० १९९१ वैक्रमाब्दे चौखम्बा-संस्कृत-सीरीज काशीतः प्रकाशिताः प्रौढमनोरमातृतीयभागस्यान्ते मुद्रिताः।

**निष्कर्ष**

उपयुक्तविवेचनात् स्पष्टं भवति यत् वैयाकरणसिद्धान्तकौमुदी संस्कृतव्याकरणपरम्परायाः अत्यन्तं प्रभावशाली ग्रन्थः अस्ति तथा तस्याः व्याख्यासम्पत्तयः तस्याः महत्त्वं बहुगुणितं कुर्वन्ति। भट्टोजिदीक्षितस्य मूलग्रन्थः पाणिनीयव्याकरणस्य अध्ययनाय सुगममार्गं प्रदर्शयति, किन्तु तस्य गूढार्थानां पूर्णबोधः विविधव्याख्यानां साहाय्येनैव सम्भवति। प्रौढमनोरमा, तत्त्वबोधिनी, बालमनोरमा इत्याद्याः व्याख्यानग्रन्थाः न केवलं सूत्रार्थानां स्पष्टीकरणं कुर्वन्ति, अपि तु व्याकरणीयपरम्परायाः


© Copyright @ Authors

ISSN:0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

विकासक्रममपि प्रकाशयन्ति। एतेषां व्याख्यानां माध्यमेन विद्यार्थिनः, अध्येतारः, अनुसन्धानकर्तारश्च व्याकरणस्य सूक्ष्मतत्त्वानि सहितया अवगन्तुं शक्नुवन्ति।

व्याख्यासम्पत्तयः भारतीयशास्त्रपरम्परायाः जीवन्ततायाः प्रमाणमपि सन्ति, यतः प्रत्येकव्याख्याकारः पूर्वाचार्याणां मतानां समीक्षणं कृत्वा स्वकीयदृष्ट्या विषयान् विशदयति। एतेन व्याकरणशास्त्रस्य निरन्तरविकासः सम्भवति। अतः निःसंशयं वक्तुं शक्यते यत् वैयाकरणसिद्धान्तकौमुद्याः व्याख्यासम्पत्तयः संस्कृतव्याकरणसाहित्यस्य बहुमूल्याः धरोहराः सन्ति। तासां योगदानेन सिद्धान्तकौमुदी अध्ययन-अध्यापनयोः सर्वाधिकप्रचलिता, सर्वाधिकोपयोगिनी च अभवत्। व्याकरणविद्यायाः संरक्षणे, संवर्धने तथा प्रचारे एतासां व्याख्यानां महत्त्वं सदा अक्षुण्णं भविष्यति।

## संदर्भ सूची

1. जम्मू रघुनाथ मन्दिर पुस्तकालय सूचीपत्र, पृ०- ५०।
2. भण्डारकर प्राच्यविद्या संस्थान पूना, व्याकरण विषयक सूची पत्र संख्या- १७०, १७१, १७३।
3. मद्रास राजकीय हस्तलेख पुस्तकालय सूचीपत्र भाग- 1, खण्ड- 1 C खण्ड पृ०- ८०८।
4. चौखम्बा संस्कृत सीरीज काशी सं० १९११ में प्रकाशित प्रौढमनोरमा भाग- ३ के अन्त में मुद्रित प्रौढमनोरमाखण्डन, पृ०- १।
5. तञ्जौर पुस्तकालय सूची पत्र भाग १०, ग्रन्थाङ्क ५६६०-५६६३, ५६६६।
6. मद्रास राजकीय हस्तलेख पुस्तकालय सूची पत्र भाग २९, पृ०- १०५७५ ग्रन्थाङ्क १५६२३४।


© Copyright @ Authors